अनुक्रमांक ..................

कूट सं. : 820123(M) – $SA_2$

## कक्षा – अष्टमी

# संस्कृतम्

## (संकलनात्मक मूल्यांकनम – II)

कृपया जाँच कर लें कि इस प्रश्न–पत्र में कुल 19 प्रश्न हैं और कुल 10 मुद्रित पृष्ठ हैं।

निश्चितसमयः – होरात्रयम् | पूर्णाङ्काः – 80

**निर्देशाः –**

1. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
2. प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
3. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् क्रमे लेखनीयानि।
4. प्रश्नपत्रे उत्तराणि न लेखनीयानि।
5. प्रश्नसंख्या प्रश्नपत्रानुसारं लेखनीया।
6. खण्डसंख्या अपि लेखनीया।

## खण्डः – 'क' (अपठित – अवबोधनम्) (5)

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्त – प्रश्नानाम् उत्तराणि लिखत –

मनुष्यः सामाजिकः प्राणी अस्ति। समाजं विहाय स एकाकी जीवितुं न शक्नोति। समाजात् एव मानवेन स्वाभिव्यक्त्यै भाषा, मनोविकासाय समुचिता शिक्षा, सम्भाषणाय च मित्राणि लभयन्ते। समाजम् अन्तरेण तु प्रथम भूतः अयं प्राणी सदैव असभ्यः असंस्कृतः च भवति। समाजस्य अनुकम्पया एव सः प्रकृतिम् अपि स्ववशी – कर्तुं समर्थोऽस्ति। वैद्याः विद्वांसः, सबलाः कलाकाराः च स्वसामर्थ्यस्य अनुरूपं समाज सेवां कृत्वा जीवने सफलाः भवितुम् अर्हन्ति।

(I) एकपदेन उत्तरत –

कः सामाजिकः प्राणी अस्ति? 1

(II) पूर्णवाक्येन उत्तरत –

समाजस्य अनुकम्पया मानवः कां वशी – कर्तुं समर्थोऽस्ति? 2

(III) निर्देशानुसारम् उत्तरत –

(क) 'शक्नोति' इति क्रियापदस्य किं कर्तृपदम् अनुच्छेदे प्रयुक्तम्? ½×4 =2

(i) मानवेन (ii) सः

(iii) भाषा (iv) शिक्षा

(ख) 'प्राणी' अस्य किं विशेषणपदम् अत्र प्रयुक्तम्?

(i) इयम् (ii) एतद्

(iii) इमम् (iv) अयम्

(ग) 'संस्कृतः' अस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(i) असंस्कृतम् (ii) असंस्कृता

(iii) असंस्कृताः (iv) असंस्कृतः

(घ) 'सम्भाषणाय च मित्राणि लभ्यन्ते' अस्मिन् वाक्ये किम् अव्ययपदं प्रयुक्तम्?

(i) सम्भाषणाय (ii) च

(iii) मित्राणि (iv) लभ्यन्ते।

## खण्डः – 'ख' (रचनात्मक – कार्यम्) (10)

2. मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन चत्वारि वाक्यानि रचयत – 1×4 = 4



मञ्जूषा : कक्षायाः, पाठयति, छात्राः, पृच्छति, छात्रा, बालकः, अध्यापिका, छात्रान्, प्रश्नम्, बालिका, वातावरणम्

3 भवान् सुमितः। भवान् दिल्ली नगरे वसति। भवतः मित्रम् अमितः कानपुरे निवसति। भवतः विद्यालये गतसप्ताहे **'ओजोनदिवसः'** मानितः। एतद् विषये मित्रं अमितं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तपदैः **पूरयित्वा पुनः लिखत** - ½×6=3

प्रिय मित्र अमित!

सप्रेम नमोनमः।

अत्र कुशलं तत्र (i) ..................। गतसप्ताहे अस्माकं विद्यालये (ii) .................. मानितः। तस्मिन् अवसरे (iii) .................. यः कार्यक्रमः (iv) .................. तेन तु सर्वे रोमाञ्चिताः (v) ..................। कथं (vi) .................. विनाशकारि जायते इति छात्रैः विविधाभिः क्रियाभिः स्पष्टीकृतम्। यदि वयं अस्मिन् विषये जागरूकाः न भविष्यामः तर्हि भविष्ये किं भविष्यति इति कोऽपि न जानाति। एषः विषयः तु गम्भीररूपेण विचारणीय एव। शेषं सर्वं कुशलम्। मातापितृभ्यां सादरं नमः।

भवतः मित्रम्

सुमितः

**मञ्जूषा :** छात्रैः, अभवन्, पर्यावरणम्, ओजोनदिवसः, प्रस्तुतः, अस्तु

4. अधोलिखिते संवादे रिक्तस्थानानि मञ्जूषायां प्रदत्तैः उचितपदैः पूरयत - ½×6=3

माता - अमिते। त्वं किं करोषि?

अमिता - (i) .................. अहम्।

माता - सर्वदा पठसि एव (ii) ..................।

अमिता - (किञ्चिद् न उत्तरति)

माता - क्षणं (iii) .................. अपि कुरु।

अमिता - (iv) .................. एव न अस्ति।

माता - किं जानासि न यद विश्रामः तु शरीराय (v) .................. एव।

अमिता - (vi) .................. अहम्।

माता - यदि जानासि त्वं तर्हि किमर्थं न विश्रामं करोषि?

अमिता - (तूष्णीं भवति)

**मञ्जूषा –** जानामि, अनिवार्यः, विश्रामम्, पठामि, त्वम्, कालः

## खण्डः – 'ग' (अनुप्रयुक्त – व्याकरणम्) (35)

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धि – विच्छेदं वा कुरुत – 1×3=3

(i) <u>तदैव</u> अध्यापकः कक्षां प्रविशति।

(ii) <u>प्रत्येकं</u> कार्यं ध्यानेन कुरुत।

(iii) <u>सदा + एव</u> सत्यं वदत।

6. (अ) उचित – पदस्य चयनं कृत्वा लिखत – ½×6=3

(क) अब्दुलकलाम महोदयस्य .................................. नाम आशियम्मा आसीत्।

(i) माता (ii) मातरम्
(iii) मातुः (iv) मात्रा

(ख) तीर्थस्थले अनेके .................................. वसन्ति।

(i) मुनिः (ii) मुनीनाम्
(iii) मुनयः (iv) मुनीन्

(ग) .................................. सर्वत्र पूज्यते।

(i) विद्वान् (ii) विद्वांसौ
(iii) विद्वांसः (iv) विदुषाम्

(घ) प्रातः उत्थाय सः .................................. नमति।

(i) पिता (ii) पित्रे
(iii) पितरम् (iv) पितुः

(ङ) .................................. एव बलात् श्रेष्ठा।

(i) मतिम् (ii) मतेः
(iii) मतिः (iv) मत्याः

(च) .................................. यज्ञं कुर्वन्ति।

(i) साधुः (ii) साधू
(iii) साधूनाम् (iv) साधवः

(आ) उचित – पदस्य चयनं कृत्वा लिखत – 1×3=3

(क) यानि अस्माकं सुचरितानि .................................. त्वया उपास्यानि।

(i) ये (ii) याः
(iii) येषाम् (iv) तानि

(ख) ................................ छात्रा: चर्चायां मग्ना: सन्ति।

(i) एतस्य (ii) एतानि

(iii) एते (iv) एष:

(ग) ................................ महापुरुष: क्षमाशील: विनम्र: च अस्ति।

(i) इयम् (ii) अयम्

(iii) इदम् (iv) अस्य

7. अधोलिखितवाक्येषु कोष्ठके प्रदत्तसंख्यां संस्कृतेन लिखत - 1×3=3

(i) कौरवा: ................................ (100) आसन्

(ii) मम विद्यालये ................................ (85) अध्यापका: सन्ति।

(iii) मम समीपे केवलं ................................ (70) रूप्यकाणि सन्ति।

8. मञ्जूषायां प्रदत्तै: अव्ययपदै: रिक्तस्थानानि पूरयत - 1×3=3

(i) ................................ एक: श्रृगाल: भोजनाय इतस्तत: भ्रमति स्म।

(ii) भोजनं ................................ स: दुर्बल: अभवत्।

(iii) स: अचिन्तयत् ................................ अहं कुत्रापि न गमिष्यामि।

मञ्जूषा – | श्व:, एकदा, विना |

9. रेखाङ्कितपदेषु उपसर्गं पृथक् कृत्वा संयोज्य वा लिखत - 1×3=3

(i) सज्जना: कार्यं कदापि न परित्यजन्ति।

(ii) अध्यापक: कक्षां प्र + विशति।

(iii) अविश्वस्ते न विश्वसेत्।

10. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत - 1×5=5

(i) विष्णवे नम:।

(ii) कृष्णात् ऋते क: अस्माकं मित्रम्।

(iii) माता पुत्राय नवीनानि वस्त्राणि यच्छति।

(iv) आचार्य: छात्रेषु स्निह्यति।

(v) बालक: मातु: पृथक् न तिष्ठति।

11. समस्तपदानां नामानि लिखत - 1×3=3

(i) प्रतिदिनम्

(ii) मातापितरौ

(iii) यथासमयम्

12. कोष्ठकप्रदत्तेषु धातुरूपेषु उचितं रूपं चित्वा रिक्तस्थानानि पूरयत - 1×5=5

(i) ते परस्परं वार्तालापं .............................।

(i) करोति (ii) कुरुत: (iii) कुर्म: (iv) कुर्वन्ति

(ii) माता पुत्रं कथयति त्वं ध्यानेन .............................।

(i) लिखतु (ii) लिख (iii) लिखन्तु (iv) लिखताम्

(iii) बिडाल: सर्वं दुग्धम् .............................।

(i) अपिबन् (ii) अपिबत् (iii) अपिबत (iv) अपिबम्

(iv) जना: परिश्रमेण किं किं न .............................।

(i) अलभत (ii) अलभन्त (iii) अलभेताम् (iv) अलभध्वम्

(v) वयं सर्वदा सत्यं .............................।

(i) वदेत् (ii) वदेयम् (iii) वदेयु: (iv) वदेम

13. अधोलिखित वाक्येषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत - 1×4=4

(i) श्रृगाल: मूषकवृन्दं <u>दृष्टवान्</u>।

(ii) छात्रा: <u>ज्ञा + तुमुन्</u> इच्छन्ति।

(iii) तत्र एका सूक्ति: <u>लिखिता</u>।

(iv) स: <u>कथ + तुमुन्</u> इच्छति।

## खण्ड: – 'घ' (पठित – अवबोधनम्) (30)

14. अधोलिखितं गद्यांशं पद्यांशं संवादं च पठित्वा प्रश्नान् उत्तरत - 12

(क) गद्यांश:

मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यानि अनवद्यानि

कर्माणि तानि सेवितव्यानि न इतराणि यानि अस्माकं सुचरितानि तानि त्वया उपास्यानि न इतराणि। 4

प्रश्ना:

(I) एकपदेन उत्तरत - 1

कीदृशनि कर्माणि अस्माभि: सेवितव्यानि?

(II) पूर्णवाक्येन उत्तरत - 1

कानि अस्माभि: उपास्यानि?

(III) निर्देशानुसारम् उत्तरत - ½×4=2

(क) 'भव' इति क्रियापदस्य किं कर्तृपदम् अत्र प्रयुक्तम्?

(i) देव: (ii) स:

(iii) अहम् (iv) त्वम्

(ख) 'कर्माणि' अस्य किं विशेषणपदम् अत्र प्रयुक्तम्

(i) सुचरितानि (ii) उपास्यानि

(iii) अनवद्यानि (iv) त्वया

(ग) 'तानि त्वया उपास्यानि न इतराणि' अस्मिन् वाक्ये किम् अव्ययपदं प्रयुक्तम्?

(i) तानि (ii) त्वया

(iii) न (iv) इतराणि

(घ) 'अनिन्दनीयानि' इत्यर्थे किं पदम् अत्र प्रयुक्तम्?

(i) कर्माणि (ii) इतराणि

(iii) सुचरितानि (iv) अनवद्यानि

(ख) पद्यांश: - 4

वाणी रसवती यस्य, यस्य श्रमवती क्रिया।

लक्ष्मी: दानवती यस्य, सफलं तस्य जीवितम्।।

प्रश्ना:

(I) एकपदेन उत्तरत - 1

वाणी कीदृशी भवेत्?

(II) पूर्णवाक्येन उत्तरत - 1

का दानवती स्यात्?

(III) निर्देशानुसारम् उत्तरत - ½×4=2

(क) 'क्रिया' अस्य किं विशेषणपदम् अत्र प्रयुक्तम्?

(i) रसवती (ii) दानवती

(iii) श्रमवती (iv) सफलम्

(ख) 'तस्य' अस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(i) एतस्य (ii) यस्य

(iii) कस्य (iv) अस्य

(ग) 'धनम्' इत्यर्थे किं पदम् अत्र प्रयुक्तम्?

(i) दानवती (ii) श्रमवती

(iii) क्रिया (iv) लक्ष्मी:

(घ) 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(i) क्रियायै (ii) मनुष्याय

(iii) दानाय (iv) धनाय

(ग) नाट्यांश: 4

आचार्य: - (सर्वान् दृष्ट्वा) किञ्चित् विशिष्टं कथयितुम् अथवा ज्ञातुम् इच्छन्ति।

सर्वे - (मिलित्वा) आम् मान्यवर! वयम् अस्माकं पूर्वराष्ट्रपतिमहोदयानां जीवनस्य विषये ज्ञातुम् इच्छाम:। कृपया वदन्तु।

आचार्य: - अतीव शोभनम्। अवश्यमेव कथयिष्यामि। प्रारम्भे अहं कथयिष्यामि। मध्ये मध्ये भवन्त: पृच्छन्तु। (श्यामपट्टं दृष्ट्वा सूक्तिं च पठित्वा) अतिशोभनम्। किम् एतदर्थम् एव इयं सूक्ति: अत्र लिखिता?

सर्वे - आम् मान्यवर।

प्रश्ना:

(I) एकपदेन उत्तरत - 1

प्रारम्भे क: कथयति?

(II) पूर्णवाक्येन उत्तरत -

सूक्ति: कुत्र लिखिता आसीत्? 1

(III) निर्देशानुसारम् उत्तरत - ½×4=2

(क) "भवन्तः" इति कर्तृपदस्य किं क्रियापदम् अत्र प्रयुक्तम्?

(i) पृच्छन्तु (ii) पृच्छ

(iii) पृच्छतु (iv) पृच्छत

(ख) 'इच्छामः' इति क्रियापदस्य किं कर्तृपदम् अत्र प्रयुक्तम्?

(i) भवन्तः (ii) त्वम्

(iii) छात्राः (iv) वयम्

(ग) 'सूक्तिः' इति विशेष्यपदस्य किं विशेषणपदम् अत्र प्रयुक्तम्?

(i) अयम् (ii) एतद्

(iii) एषः (iv) इयम्

(घ) 'अन्ते' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्।

(i) प्रारम्भः (ii) प्रारम्भस्य

(iii) प्रारम्भे (iv) प्रारम्भात्

15. अधोलिखितकथनस्य भावम् उचितपदैः पूरयत - 1×4=4

(अ) कृण्वन्तो विश्वमार्यम्।

भावः - वयं सर्वे मिलित्वा विश्वस्य सर्वेषां .................. दोषान् दूरीकृत्य सम्पूर्णं .................. एव आर्यं करवाम।

(आ) गुणी गुणं वेत्ति न वेत्ति निर्गुणः।

भावः - गुणवान् जनः एव वस्तूनां जनानां वा गुणस्य .................. जानाति। .................. जनाः विदुषः मूल्यं न जानन्ति।

**मञ्जूषा** – | महत्वम्, विश्वम्, मूर्खाः, जनानाम् |

16. श्लोकं पठित्वा अन्वयम् उचितपदैः पूरयित्वा लिखत - ½×8=4

(अ) वृत्तं यत्नेन संरक्षेत् वित्तम् आयाति याति च।

अक्षीणः वित्ततः क्षीणः वृत्ततः तु हतो हतः।।

अन्वयः - वृत्तं यत्नेन संरक्षेत् वित्तं तु .................. याति च। वित्ततः .................. तु अक्षीणः .................. तु .................. हतः (भवति)

(आ) येषां न विद्या न तपो न दानम्,

**ज्ञानं न शीलं न गुणो न धर्मः।**

ते **मर्त्यलोके भुवि भारभूताः,**

**मनुष्यरूपेण मृगाः चरन्ति।।**

अन्वयः - येषां न विद्या न तपः न ........................ न ज्ञानं न शीलं न ........................ न धर्मः च (भवति) ते ........................ भुवि भारभूताः ........................ मृगाः चरन्ति।

17. अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण पुनः लिखत - 1×4=4

(i) श्रृगालः मूषकाणां बिलात् बहिः तिष्ठति।

(ii) मूषकाणां राजा हृष्टः पुष्टः आसीत्।

(iii) श्रृगालः मूषकान् अपश्यत्।

(iv) श्रृगालः भोजनाय इतस्ततः भ्रमति स्म।

18. अधोलिखितेषु कथनेषु रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत - 1×4=4

(i) मूषकराजः श्रृगालं कथयति।

(ii) विद्या मानवस्य वास्तविकं नेत्रं मन्यते।

(iii) जलेन पूरितः घटः शब्दं करोति।

(iv) छात्राः पितुः देवतावत् आदरं कुर्युः।

19. अधोलिखितपदेषु उचितार्थपदैः सह मेलनं कुरुत - ½×4=2

| | | |
|---|---|---|
| (i) अनन्तरम् | - | कुम्भः |
| (ii) घटः | - | स्वभावः |
| (iii) शीलम् | - | एकवारम् |
| (iv) एकदा | - | पश्चात् |